नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 16

No. of Printed Pages — 3

# P—16–3—Sans. III

## प्रवेशिका परीक्षा, 2010

### संस्कृत — तृतीय पत्रम्

### ( संस्कृत साहित्य — गद्य-काव्य एवं रचना )

समय : $3\frac{1}{4}$ होरा:

पूर्णांक : 40

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्क: अनिवार्यत: लेख्य: ।

(2) सर्वे प्रश्ना: अनिवार्या: ।

(3) प्रत्येकं प्रश्नस्योत्तरमुत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्योत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

(5) प्रथम प्रश्नस्य चत्वार: ( i, ii, iii एवं iv ) भागा: सन्ति । प्रत्येक भागस्य उत्तरस्य चत्वार: ( **अ, ब, स** एवं **द** ) विकल्पा: सन्ति । समुचित विकल्पस्य उत्तराक्षरं उत्तर-पुस्तिकायां निम्नलिखित तालिकां निर्माय एकस्मिन् स्थाने एव लेखनीयानि ।

| प्रश्न क्रमाङ्कः | समुचित उत्तराक्षरम् |
|---|---|
| 1. (i) | |
| 1. (ii) | |
| 1. (iii) | |
| 1. (iv) | |

1. (i) ध्वज: कुत्रारोहति ?

(अ) मन्दिरे (ब) वंशस्याग्रे

(स) गृहे (द) यमुनातीरे । $\frac{1}{2}$

(ii) कीदृश: पुरुष: स्वपत्न्यापि त्यक्तो भवति ?

(अ) शूरवीर: (ब) गुणवान्

(स) कुलीन: (द) धनहीन: । $\frac{1}{2}$

(iii) मूर्खाणां ह्युपदेशो भवति

(अ) शान्तये (ब) हास्याय

(स) प्रकोपाय (द) विनोदाय । $\frac{1}{2}$

(iv) नार्या: परमं भूषणं किम् ?

(अ) भ्राता (ब) भर्त्ता

(स) मित्रम् (द) माता । $\frac{1}{2}$

2. को बभूव वर्धमान: ? 1

3. विलास: कुत्र निवसति स्म: ? 1

4. स्वभावेन निरपराध: क: आसीत् ? 1

5. के के भारतभूमे: महिमानं गायन्ति ? 2

6. शाखामृगा: मधुर फलानि दृष्ट्वा किमकुर्वन् ? 2

7. वृद्ध: शशक: किमवदत् ? 2

8. वृद्धा: किं वदन्ति ? 2

9. (i) 'एध' धातो: लट् लकारे, मध्यम पुरुषस्य रूपाणि लिखत । 1

(ii) 'तुद्' धातो:, लट् लकारे, प्रथम पुरुषस्य रूपाणि लिखत । 1

10. केषाञ्चित् **पञ्च** वाक्यानां संस्कृतेऽनुवादो विधेय: — $5 \times 1 = 5$

(i) राजा से चोर छिपता है ।

(ii) उपाध्याय विद्यार्थियों के साथ घूमता है ।

(iii) वह उस ब्राह्मण के लिए धन देता है ।

(iv) विद्यालय के चारों ओर पुष्प है ।

(v) नर्मदा के तट पर विशाल वट वृक्ष है ।

(vi) सभी पक्षी समुद्र तीर पर गये ।

(vii) शक्तिधर की माता ने कहा ।

11. अधोलिखितयो: कथयो: **एकस्य** सारांश: संस्कृते हिन्द्यां वा लेखनीय: — 3

(i) टिट्टिभसमुद्रकथा

(ii) गर्दभो व्याघ्रचर्मणि ।

12. निम्न गद्यांशस्य ससन्दर्भं भावार्थो लेख्य: — $\frac{1}{2} + 1\frac{1}{2} = 2$

तत्र निर्मित नीड क्रोडे पक्षिणो निवसन्ति सुखेन । अथैकदा वर्षासु नीलपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव ।

13. अधोलिखित-पद्यांशस्य भावार्थो सप्रसङ्गं लेखनीय: — $\frac{1}{2} + 1\frac{1}{2} = 2$

आत्मनश्च परेषां च य: समीक्ष्य बलाबलम् ।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभि: ॥

14. अधोलिखितेषु गद्यांशेषु केषाञ्चित् **त्रयाणां** सप्रसङ्गं व्याख्या कार्या — $\frac{1}{2} + 1\frac{1}{2} = 2 \times 3 = 6$

(अ) तच्छ्रुत्वाऽतीव व्याकुल हृदय: ससाध्वसम् आकारं प्रच्छाद्य वटतले चतुर्मण्डलावस्थानेनाऽवस्थित: । चतुर्मण्डलावस्थानंत्विदं-सिंह, सिंहानुयायिन:, काकरवा:, किंवृत्ताश्चेति । अथ तस्य करटक-दमनक नामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनावास्ताम् । तौ च परस्परं मन्त्रयत: ।

(ब) अथ कदाचिद् पिङ्गलकस्यैव भ्राता स्तब्धकर्णनामा सिंह भ्रातु: दर्शनाय समायात: । स्तब्धकर्णं स्वानुजं समायान्तं दृष्ट्वा पिङ्गलक: प्रेम्णा स्वागतार्थं समुत्थित: । उपागतं भ्रातरं बाहूभ्यां परिष्वज्य पिङ्गलकोऽवदत्-भ्रात: ! अपि शिवं भवत: । अपि स्वस्था: तेऽस्मत्परिजना: ।

(स) अस्त्युज्जयिनीवर्त्मप्रान्तरे प्लक्षतरु: । तत्र हंसकाकौ निवसत: । कदाचिद् ग्रीष्मसमये परिश्रान्त: कश्चित्पथिकस्तत्र तरुतले धनु: काण्डं संनिधाय सुप्त: । तत्र क्षणान्तरे तन्मुखाद् वृक्षच्छायापगता । तत: सूर्य तेजसा तन्मुखं व्याप्तमवलोक्य तद्वृक्षस्थितेन हंसेन कृपया पक्षौ प्रसार्य पुनस्तन्मुखेछाया कृता ।

(द) तत राजापि खड्गमादाय तदनुसरणक्रमेण नगराद् बहिर्निजगाम । गत्वा च वीरवरेण रुदती रुपयौवन सम्पन्ना सर्वालंकारभूषिता काचित्स्त्री दृष्टा, पृष्टा च कात्वम् ? किमर्थं रोदिषि ? स्त्रियोक्तम् 'अहमेतस्य शूद्रकस्य राजलक्ष्मी:' ।

15. कस्याप्येकं विषयमवलम्ब्य स्वसंस्कृते निबन्धो लेखनीय: — 4

(i) विद्याधनं सर्वधनप्रधानम्

(ii) आचार: परमो धर्म:

(iii) वर्तमान युगे स्त्री शिक्षा ।

16. स्वयं मनोज: इति मत्वा राजकीय प्रवेशिका संस्कृत विद्यालय, शाहपुरा-प्रधानाध्यापकाय रुग्णता विषये निहयस्य अवकाशाय प्रार्थनापत्रं लिखत । 3

**अथवा**

नगरपालिका प्रशासकाय परीवाद पत्रम् ( शिकायती पत्र ) लिखत ।